# Buddhabhattaraka Stotram

# बुद्धभट्टारकस्तोत्रम्

## Document Information

Text title : Buddhabhattaraka Stotram

File name : buddhabhaTTArakastotram.itx

Category : vishhnu, buddha, stotra

Location : doc_vishhnu

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# बुद्धभट्टारकस्तोत्रम्

ॐ नमो बुद्धाय ।
सम्बुद्धं पुण्डरीकाक्षं सर्वज्ञं करुणात्मकम् ।
समन्तभद्रं शास्तारं शाक्यसिंहं नमाम्यहम् ॥ १॥

श्रीघनं श्रीमतिं श्रेष्ठं शीतराशिं शिवङ्करम् ।
श्रीमन्तं श्रीकरं शान्तं शान्तमूर्तिं नमाम्यहम् ॥ २॥

नैरात्म्यवादिनमिन्दुं निरवद्यं निराश्रयम् ।
श्रुतिज्ञं निर्मलात्मानं निस्थूलकं नमाम्यहम् ॥ ३॥

निरोधकं नित्यज्ञानं निर्विकल्पं तथागतम् ।
नियतं निधिनाकेशं निष्प्रपञ्चं नमाम्यहम् ॥ ४॥

विश्वेश्वरं विमुक्तिज्ञं विश्वरूपं विनायकम् ।
विश्वब्रह्म सुसम्पन्नं वीतरागं नमाम्यहम् ॥ ५॥

विद्याचरणसम्पन्नं विश्वेशं विमलप्रभम् ।
विनिमज्ञं सविष्टम्भं वीतमोहं नमाम्यहम् ॥ ६॥

दुर्दान्तदमकं शान्तं शुद्धं शौद्धोदनिं मुनिम् ।
सुगतं सुगतिं सौम्यं शुभ्रकीर्तिं नमाम्यहम् ॥ ७॥

योगेश्वरं दशबलं लोकज्ञं लोकपूजितम् ।
लोकाचार्यं लोकमूर्तिं लोकनाथं नमाम्यहम् ॥ ८॥

कनकमूर्तिं कर्माब्धिमकलङ्कं कलाधरम् ।
कान्तमूर्तिं दयापात्रं कनकाभं नमाम्यहम् ॥ ९॥

महामतिं महावीर्यं महाविज्ञं महाबलम् ।
महामहं महाधैर्यं महाबाहुं नमाम्यहम् ॥ १०॥

आद्यं पवित्रं तद्ब्रह्ममपराजितमद्भुतम् ।

आर्यं परहितं नाथममिताभं नमाम्यहम् ॥ ११॥

देवदेवं महादेवं दिव्यं वन्दितमव्ययम् ।
प्रमाणभूतं देवेशं दिव्यरूपं नमाम्यहम् ॥ १२॥

परमार्थं परज्योतिं परमं परमेश्वरम् ।
भावाभावकरं श्रेष्ठं भगवन्तं नमाम्यहम् ॥ १३॥

चतुर्मारादिविजितं तत्त्वज्ञं शङ्करं शिवम् ।
तत्त्वसारं सदाचारं सार्थवाहं नमाम्यहम् ॥ १४॥

जितेन्द्रियं जितक्लेशं जिनेन्द्रं पुरुषोत्तमम् ।
उत्तमं सत्पदं ब्रह्म पुण्यक्षेत्रं नमाम्यहम् ॥ १५॥

एतैः स्तुत्वा मुनिश्रेष्ठं नरा विगतकल्मषाः ।
प्राप्नुवन्ति पदं मोक्षं दिव्यं त्वथ सनातनम् ॥ १६॥

यस्त्विदं पठते नित्यं प्रातरूत्थाय पण्डितः ।
नाम्नामष्टोत्तरशतं पवित्रं पापनाशनम् ॥ १७॥

लभते चेप्सितान् भोगान् सौमनस्येन वर्णितान् ।
व्याधयोऽपि न बाध्यन्ते पातकं च विनश्यति ॥ १८॥

आयुरारोग्यमैश्वर्यसर्वमोक्षसमन्वितः ।
मेधावी च तथा वाग्मी जायते जन्मजन्मनि ॥ १९॥

इति बुद्धभट्टारकस्य ब्रह्माविरचितं स्तोत्रं सम्पूर्णम् ॥

*Buddhabhattaraka Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*